॥ श्री जिनाय नमः ॥

॥ श्रीपौषदशमीकथा ॥

(गूर्जरभाषांतरोपेतम्)

—छपावी प्रसिद्ध कर्त्ता—

पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

विक्रम् संवत् १९८२ वीर संवत् २४५२ सने १९२६.

मूल्यम् रु. ०-८-०

श्री जैन भास्करोदय प्रिन्टिंग प्रेस—जामनगर.

॥ श्री जिनाय नमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

॥ अथ श्रीपौषदशमीकथा प्रारभ्यते ॥

(गुर्जरभाषांतरसहिता)

(कर्ता—श्रीजिनेंद्रसागरजी)

भाषांतरकर्ता तथा छपावी प्रसिद्ध कर्ता—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा.)

ध्यात्वा वामेयमर्हंत-ममेयमहिमास्पदं ॥ वक्ष्ये कथां पौषमास-सत्कृष्णदशमीतिथेः ॥ १ ॥

प्रमाणविनाना माहात्म्यना स्थानरूप एवा श्रीपार्श्वनाथप्रभुनुं ध्यान धरीने पोषमासनी कृष्णपक्षनी दशमी तिथिनी कथा कहीश. ॥ १ ॥

अत्रैव भरतक्षेत्रे । राजद्राजगृही पुरी ॥ धनधान्यसमाकीर्णा । बभौ स्वर्गपुरी यथा ॥ २ ॥

आज भरतक्षेत्रमां धन तथा धान्यथी भरेली एवी राजगृही नामे मनोहर नगरी हती, के जे स्वर्गपुरीनी पेठे शोभती हती. २

एकदा विहरन् भूमा-वुद्याने समवसृतः ॥ भगवान् श्रीमहावीरः । केवलज्ञानभास्करः ॥ ३ ॥

एक वखते केवलज्ञानथी सूर्य सरखा श्रीमहावीरप्रभु पृथ्वीपर विहार करता थका (ते नगरीना) उद्यानमां आवी समोसर्या. ॥ ३ ॥

गौतमप्रमुखैर्मुख्यै–रेकादशगणाधिपैः ॥ चतुर्दशसहस्रैश्च । साधुभिः सह संवृतः ॥ ४ ॥

ते श्रीवीरप्रभु गौतमस्वामीआदिक अग्यार गणधरो, तथा चौदहजार साधुओवडे करीने वींटायेला हता. ॥ ४ ॥

जिनागमनमाकर्ण्य । नागरा वंदनोत्सुकाः ॥ वंदनार्थं समाजग्मुः । श्रेणिकक्षितिपा अपि ॥ ५ ॥

श्री जिनेश्वरप्रभुनुं आगमन सांभळीने तेमने वांदवाने उत्सुक थयेला नगरना लोको तथा श्रेणिकराजा पण त्यां वांदवा आव्या. ॥ ५ ॥

त्रिःप्रदक्षिणकां कृत्वा । नत्वा च विधिना जिनं ॥ समासीनाः सभामध्ये । नृपाला भूस्पृशोऽपि च ।६।

भगवानने त्रण प्रदक्षिणा करीने, तथा विधिपूर्वक नमीने राजा तथा नगरना लोको सभानी अंदर बेठा. ॥ ६ ॥

दिदेश श्रीजिनेशो द्राग् । देशनां धर्मदेशनां ॥ मुधाकृतसुधां शुद्धां । तत्क्षणे तत्सभापुरः ॥ ७ ॥

ते वखते श्रीजिनेश्वरप्रभु अमृतने पण फोकट करनारी अने धर्मनो मार्ग देखाडनारी निर्मल देशना ते सभानी आगळ तुरत आपवा लाग्या. ॥ ७ ॥

अत्रांतरे महावीरं । नंत्रासारः क्षमापतिः ॥ नत्वा व्यजिज्ञपद्वीरं । नियोजितकरद्वयः ॥ ८ ॥

एवामां श्रेणिकराजाए श्रीमहावीरप्रभुने नमस्कार करीने तथा बन्ने हाथ जोडीने तुरत विनंति करी के, ॥ ८ ॥

हे स्वामिन् पौषमासेऽस्मिन् । सर्वोत्कृष्टस्तु वासरः ॥ वर्तते कस्तदाख्याहि । कृपां कृत्वा सत्रापुरः ॥ ९ ॥

हे भगवन्! आ पोषमासमां सर्वथी उत्तम दिवस कयो छे? ते कृपा करीने आ सभासमक्ष कहो? ॥ ९ ॥

लाभं विज्ञाय्य भगवा- नूचिवानिति सद्वचः ॥ पौषमासाद्यदशमी-वासरः पुण्यत्रासुरः ॥ १० ॥

त्यारे लाभ जाणीने भगवाने एवुं उत्तम वचन कह्युं के, पोषमासनी वद दशमनो दिवस पुण्योवडे करीने उत्तम छे. ॥ १० ॥

तत्कथां श्रेणिको भूपः । पप्रच्छ स्वामिनः पुरः ॥ अत्राषिष्ट जिनश्रेष्ठो । माहात्म्यं दशमीतिथेः ॥ ११ ॥

पछी श्रेणिक राजाए भगवाननी पासे तेनी कथानो संबंध पूछ्यो, त्यारे ते भगवान पण ते पोशदशमीनी तिथिनुं माहात्म्य कहेवा लाग्या. ॥ ११ ॥

जंबूद्वीपे मेरुपार्श्वे । समभूतलपर्वतः ॥ योजनानां नवसंख्य-शतमध्ये ग्रहव्रजाः ॥ १२ ॥

जंबूद्वीपमां मेरुपर्वतनी पासे समभूतला पृथ्वीथी नवसो जोजननी अंदर ग्रहोना समूहो छे. ॥ १२ ॥

ततः परमसंख्याता । योजन्यकोटिकोटयः ॥ उल्लंघितेषु तेषूर्ध्वं । सौधर्मेशानसद्दिवौ ॥ १३ ॥

तेथी आगळ असंख्याता कोटाकोटि जोजनो जाणवां, ते जोजनो उल्लंघ्याबाद उंचे सौधर्म तथा ईशान नामना देवलोक छे. १३

क्रमेण दशमः स्वर्गः । प्राणताख्यः प्रसिद्धिभाक् ॥ आयुषः संस्थितिस्तत्र। सागराणां तु विंशतिः १४

पछी अनुक्रमे दशमो प्राणतनामनो प्रसिद्ध देवलोक छे, अने त्यां वीश सागरोपमनी आयुनी स्थिति छे. ॥ १४ ॥

तदायुषः स्थितिं भुक्त्वा । कृत्वा देवभवक्षयं ॥ अच्युतस्वर्गतस्तस्मात् । पार्श्वजीवो महासुरः ॥ १५ ॥

एवी रीतनी आयुनी ते स्थिति भोगवीने, तथा देवभवनो क्षय करीने ते पार्श्वप्रभुना जीवरूपी महान् देव ते स्वर्गथी चव्यो. १५

जंबूद्वीपो महाद्वीपो। लक्षयोजनविस्तृतः ॥ परिधिस्तस्य विख्याता । सिद्धांते तां भणाम्यथ ॥१६॥

एक लाख जोजनना विस्तारवाळो जंबूद्वीप नामनो म्होटो द्वीप छे, अने ते द्वीपनो जे घेरावो आगममां कहेलो छे, ते हवे हुं कहुं छुं. १६

यतः–परिही तिलक्खसोलस–सहस्सदोयसत्तवीसहिया ॥

कोसतिगट्ठावीसं । धणुसयतेरंगुलद्धहियं ॥ १७ ॥

(परिधिस्त्रिलक्षषोडश–सहस्रद्विशतसप्तविंशत्यधिकः ॥ कोशत्रिकाष्टाविंशति–धनुःशतत्रयोदशांगुलार्धाधिकः)

त्रण लाख शोळ हजार बसोसतावीस जोजन, त्रण कोश, अठ्ठावीश धनुष अने साडातेर आंगुल छे. ॥ १७ ॥

तत्र श्रीभरतक्षेत्रे । भरिते भूरिभूतिभिः ॥ पुरं वाराणसीसंज्ञं । पुरंदरपुरोपमं ॥ १८ ॥

ते जंबूद्वीपमां आवेला, तथा घणी समृद्धिथी भरेला एवा भरतक्षेत्रमां इंद्रनी नगरी सरखुं वाराणसी नामनुं नगर छे. ॥१८॥

निशम्यते यत्र पुरे तु दंडः । प्रासादशीर्षे न पुनः प्रजासु ॥

विद्वज्जनानां मनसस्तु चौराः । श्रियाश्च चौरा नहि संति केचित् ॥ १९ ॥

जे नगरमां " दंड " तो देवमंदिरोना शिखरोपर संभळाय छे, परंतु प्रजाने विषे संभळातो नथी, अने " चोरो " पण विद्वान मनुष्योना मनना संभळाय छे, परंतु खरेखर लक्ष्मीना चोरो त्यां कोइ पण नथी. ॥ १९ ॥

प्रासादमूर्ध्नः कल शस्थले हि । यत्रार्कबिंबं प्रतिभाति नित्यं ॥

केतुस्थले स्वर्गनदी मनोज्ञा । किं वर्ण्यते वर्णनमेव तस्याः ॥ २० ॥

वळी जे नगरमां हमेशां जिनमंदिरोना शिखरपर कुंभनी जगोए सूर्यनुं बिंब शोभे छे, तथा धजाओने स्थाने मनोहर देवगंगा शोभी रही छे, ए रीते ते नगरीनुं केटलुंक वर्णन करीयें ? ॥ २० ॥

अन्यायं इति शब्दस्तु । शास्त्रेषु जनतासु नो ॥ दातारः प्रचुरा यत्र । याचकाः स्तोकमात्रकाः ॥२१॥

वळी जे नगरमां " अन्याय " ए शब्द तो फक्त शास्त्रोमांज संभळातो हतो, परंतु लोकोमां नहोतो, वळी ज्यां दान आपनारा दातारो घणा हता, अने याचको तो फक्त थोडा हता. ॥ २१ ॥

तत्राश्वसेनभूपालो । भूपालालिपुरस्सरः ॥ प्रजापालनसंसक्तो । राजते सार्वभौमवत् ॥ २२ ॥

ते नगरमां राजाओनी श्रेणिमां अग्रेसर, तथा प्रजानुं पालन करवामां तत्पर एवो अश्वसेन नामे राजा चक्रवर्तिनी पेठे शोभे छे. २२

रतिवच्चारु रूपाढ्या । सुपौलोमीव सुंदरा ॥ स्फारलावण्यसंपूर्णा । तिरस्कृततिलोत्तमा ॥ २३ ॥

वामा वामभ्रुवां मध्ये–ऽभिरामा गुणराजिभिः ॥ वामाराज्ञी बभौ तस्य । पट्टराज्ञी शुभाशया ॥२४॥

ते राजाने (कामदेवनी स्त्री) रतिनी पेठे मनोहर रूपवाळी, तथा उत्तम इंद्राणीनी पेठे सुंदर, अने विस्तारयुक्त लावण्यथी भरेली, तथा (रूपआदिकथी) तिलोत्तमानो पण तिरस्कार करनारी, ॥ २३ ॥ तथा गुणोनी श्रेणिवडे करीने स्त्रीओमां मनोहर, अने शुभ विचारवाळी वामा नामनी पट्टराणी शोभती हती. ॥ २४ ॥

तस्याः कुक्षौ समुत्पेदे । श्रीपार्श्वपरमेश्वरः ॥ राज्ञी ददर्श तद्रात्रौ । स्वप्नानि च चतुर्दश ॥२५॥

तेणीना उदरमां श्रीपार्श्वनाथ तीर्थंकर उत्पन्न थया, अने ते रात्रिए राणीए चौद स्वप्नो जोयां. ॥ २५ ॥

आद्यस्वप्ने गजो दृष्टो । द्वितीये वृषभः शुभः ॥ तृतीये केसरीसिंहो । महालक्ष्मीश्चतुर्थके २६

पहेला स्वप्नमां तेणीए हाथी जोयो, बीजा स्वप्नमां मनोहर वृषभ, त्रीजा स्वप्नमां केसरीसिंह तथा चोथा स्वप्नमां तेणीए महालक्ष्मी दीठां. ॥ २६ ॥

पंचमे पुष्पमाला च । षष्ठे स्वप्ने हिमद्युतिः ॥ सप्तमे सविता दृष्टो । ध्वजा दृष्टाष्टमे तया ॥२७॥

पांचमा स्वप्नमां पुष्पोनी माळा, छठ्ठा स्वप्नमां चंद्र, सातमा स्वप्नमां सूर्य, तथा आठमा स्वप्नमां तेणीए धजा दीठी. २७

नवमे कलशः पद्म-सरस्तु दशमे तथा ॥ एकादशे पयः सिंधु-र्द्वादशे सुरमंदिरं ॥ २८ ॥

नवमा स्वप्नमां कलश, तथा दशमां स्वप्नमां पद्मसरोवर, अग्यारमा स्वप्नमां क्षीरसमुद्र, तथा बारमा स्वप्नमां तेणीए देवविमान दीठुं. ॥ २८ ॥

त्रयोदशे रत्नराशि-र्निर्धूमाग्निश्चतुर्दशे ॥ स्वप्नान्येतानि दृष्ट्वा चा-जागरत्सा स्वयं तदा ॥ २९ ॥

तेरमा स्वप्नमां रत्नोनो समूह, तथा चौदमा स्वप्नमां धूमाडाविनानो अग्नि तेणीए जोयो. ए रीतनां चौद स्वप्नो जोइने ते वामामाता ते समये पोतानी मेळे जाग्यां. ॥ २९ ॥

मुमोद मनसि स्वप्नान् । तान् सस्मार पुनः पुनः ॥ जिनानां गोत्रदेवीनां । नामानि समुपाददे ३०

पछी ते मनमां हर्ष पामीने ते स्वप्नोने वारंवार संभारवा लाग्यां, तथा तीर्थंकरोनां अने गोत्रदेवीओनां नामो लेवा लाग्यां. ३०

समुत्थाय ततः स्थाना-द्विचरंती शनैः शनैः ॥ श्रीअश्वसेनभूभर्तुः । समीपे सा समागमत् ॥३१॥

पछी ते जगोएथी उठीने धीमे धीमे चालतां एवां ते वामाराणी अश्वसेन राजा पासे आव्यां. ॥ ३१ ॥

प्राबोधयद्भवं राज्ञा । सुधामधुरया गिरा ॥ राजापि जागरामास । कृत्वालस्यांगमोटनम् ॥३२॥

पछी तेमणे अमृत सरखी मधुर वाणीथी (पोताना) स्वामीने जगाड्या, त्यारे ते राजा पण आलसमांथी अंग मरडीने जाग्या. ३२

पप्रच्छ राजा हे देवि । सांप्रतं कथमागता ॥ तदा स्माह त्वहं स्वामिन् । सुप्तावासगृहे वरे ३३

पछी राजाए तेणीने पूछ्युं के, हे देवी! हमणां तमो केम आव्यां? त्यारे तेणीए कह्युं, के हे स्वामी! (आजे) हुं मनोहर आवासभुवनमां सूती हती, ॥ ३३ ॥

जाग्रतीषद्धारणादि-सुस्वप्नानि चतुर्दश ॥ प्रबुद्धा प्रविलोक्यैवं । तत्फलं ब्रूहि मत्पुरः ॥ ३४ ॥

(ते वखते) जरा जागतीथकी आ रीते ते हाथी आदिक मनोहर चौद स्वप्नोने जोइने हुं जागेली छुं, माटे ते स्वप्नोनुं फल मने कहो? ॥ ३४ ॥

दृष्टानि चारुस्वप्नानि । राजा प्राह त्वयानघे ॥ आत्मनोर्भविता पुत्र-श्चक्रवर्ती जिनोऽथवा ३५

त्यारे राजाए कह्युं के, हे कल्याणि! तमोए मनोहर स्वप्नो जोयां छे, तेथी आपणने चक्रवर्ती अथवा जिनेश्वररूप पुत्र थशे. ३५

सत्यमेतदिति प्राह । राज्ञी भूधवसद्भवं ॥ उररीकृत्य तद्वाक्यं । जगाम निजमंदिरे ॥ ३६ ॥

त्यारे राणीए पोताना उत्तम स्वामी एवा ते राजाने कह्युं के, आपनुं ते वचन सत्य छे, ए रीते तेमनुं ते वाक्य स्वीकारीने ते पोताना वासभुवनां गई. ॥ ३६ ॥

प्रातःकाले समाहूताः । पंडिताः स्वप्नपाठकाः ॥ तेऽपि प्रोचुस्तथा स्वप्न–फलमेका मतिः सतां ३७

पछी प्रभाते (राजाए) स्वप्नफल कहेनारा पंडितोने बोलाव्या, त्यारे तेओए पण तेज रीते स्वप्नोनुं फल कह्युं, केमके सज्जनोनी एकज प्रकारनी बुद्धि होय छे. ॥ ३७ ॥

नातिरूक्षं नातितिक्तं । नात्युष्णं नातिशीतलं ॥ भोजनं भोजयामास । स्वगर्भकुशलाय सा ३८

पछी ते वामामाता पोताना गर्भना कल्याण माटे नही अति लूखां, नही अति तीखां, नही अति उष्ण, तथा नही अति शीतल एवां भोजन करवा लागी. ॥ ३८ ॥

क्रमेण नवमासाना–मथ संपूर्णतां गते ॥ उच्चैः स्थितैर्ग्रहैः सर्वै–र्निष्पन्ने क्षितिमंडले ॥ ३९ ॥ हेमंततोर्द्वितीयश्च । मासः श्रीपौषसंज्ञकः ॥ आद्यः पक्षस्ततश्चैव । तस्यैव दशमीतिथौ ॥ ४० ॥ पुत्ररत्नं तदा राज्ञी । सुषुवे सुखकारकं ॥ बिंबोष्ठं चंद्रवद्वक्त्रं । नीलपद्मतनुद्युविं ॥ ४१ ॥ लक्षणैर्ल-

क्षितं सम्यक् । कदलीगर्भकोमलं ॥ सुरासुरनरैर्वंद्यं । श्रीपार्श्वपरमेश्वरं ॥ ४२ ॥ चतुर्भिः कलापकं ॥

पछी अनुक्रमे नव मासो संपूर्ण थयाबाद, ग्रहो उंच स्थानकमां आव्ये छते, तथा पृथ्वीमंडलपर (सर्व धान्य विगेरे) पाकते छते ॥ ३९ ॥ हेमंतऋतुनो पोषनामनो बीजो मास, तेनुं पहेलुं पखवाडीयुं, अने तेनी दशमने दिवसे ॥ ४० ॥ ते वामामाताए सुख करनारा, बिंबिफलसरखा होठवाळा, चंद्रसरखा मुखवाळा, अने श्याम कमलसरखी शरीरनी कांतिवाळा, ॥ ४१ ॥ शुभ लक्षणोवाळा, केळना गर्भ समान कोमळ शरीरवाळा, अने देवो, दानवो तथा मनुष्योने वंदन करवा लायक, एवा श्रीपार्श्वनाथ नामना तीर्थंकररूपी उत्तम पुत्रने जन्म आप्यो. ॥ ४२ ॥

तस्मिन्नेव क्षणे भक्त्या । चतुःषष्टिः सुरेश्वराः ॥ अमी मिलन् प्रभोर्जन्मा-भिषेकविधिहेतवे ॥ ४३ ॥

तेज वखते प्रभुना जन्माभिषेकनी क्रिया करवा माटे भक्तिपूर्वक चोसठ देवेंद्रो एकठा थया. ॥ ४३ ॥

प्रभुं नत्वा स्तवैः स्तुत्वा । गृहीत्वा करसंपुटे ॥ चतुःषष्टिः सुराधीशा । आजग्मुर्मेरुपर्वते ॥ ४४ ॥

पछी ते चोसठे इंद्रो प्रभुने नमीने स्तुतिओवडे स्तवीने, तथा हस्तसंपुटमां लेइने मेरुपर्वतपर आव्या. ॥ ४४ ॥

मेरुपर्वतचूलाया-मुपाविश्य जिनेश्वरं ॥ सौधर्मेंद्रादयश्चक्रुः । स्वामिनो जननोत्सवं ॥ ४५ ॥

पछी ते सौधर्मेंद्र आदिक देवोए भगवानने मेरुपर्वतना शिखरपर बेसाडीने तेमनो जन्ममहोत्सव कर्यो. ॥ ४५ ॥

प्रत्यागताः सुराधीशाः । कृत्वा पार्श्वजिनोत्सवं ॥ आत्मानं कृतकृत्यार्थं । मन्यमाना मुहुर्मुहुः ॥४६॥

पछी ते देवेद्रो श्रीपार्श्वप्रभुनो जन्ममहोत्सव करीने, तथा पोताने वारंवार कृतार्थ मानताथका पाछा गया. ॥ ४६ ॥

रूप्यहाटकरत्नानां । द्वात्रिंशत्कोटिवृष्टयः ॥ ततो भूपगृहे देवाः । पातयामासुराशु ते ॥ ४७ ॥

पछी ते देवोए तुरत बत्रीश क्रोड रूपुं, सुवर्ण तथा रत्नोनी ते अश्वसेन राजाने घेर वृष्टि करी. ॥ ४७ ॥

अथ द्वितीयबालेंदु–रिव बालः प्रभुः स्वयं ॥ वर्धते लालितः शश्वत् । पंचभिर्धातृमातृभिः ॥४८॥

हवे ते बाल्यअवस्थावाळा प्रभु बीजना चंद्रनी पेठे हमेशां पांच धावमाताओवडे लालन कराता थका पोतानी मेळे वृद्धि पामवा लाग्या. ॥ ४८ ॥

क्रमेण यौवनं प्राप्तः । श्रीपार्श्वपरमेश्वरः ॥ पित्रा प्रभावतीराज्ञ्या । विवाहो विहितः प्रभोः ४९

अनुक्रमे ते श्रीपार्श्वनाथप्रभु यौवनवयने पाम्या, त्यारे पिताए ते भगवाननो प्रभावती नामनी राणी साथे विवाह कर्यो. ४९

अन्येद्युस्तत्पुरीबाह्ये । तापसः कमठः शठः ॥ पंचाग्निसाधकोऽकुंठ । आगतोऽज्ञानकष्टकृत् ॥५०॥

एवामां एक समये ते नगरनी बहार दुष्ट बुद्धिवाळो, तथा अटकावरहित पंचाग्नि साधनारो, अने अज्ञान कष्ट करनारो कमठ नामे एक तापस आव्यो. ॥ ५० ॥

गवाक्षस्थेन पार्श्वेन । सेवकानां तदा मुदा ॥ पृष्टं भोः सेवकाश्चाद्य । कुत्र गच्छंति नागराः ५१

ते वखते झरुखामां बेठेला पार्श्वनाथप्रभुए हर्षवडे सेवकोने पूछ्युं के, हे सेवको! आजे आ नगरना लोको क्यां जाय छे ? ५१

तैः प्रोक्तं युवराजेंद्र । तापसः कमठाभिधः ॥ समागतोऽस्ति तं नंतुं । तत्र लोका व्रजंत्यमी ॥५२॥

त्यारे तेओए कह्युं के, हे युवराजाधिपति! कमठ नामनो तापस आवेलो छे, अने तेने वांदवा माटे आ लोको त्यां जाय छे. ५२

ऐरावतगजस्पर्धि–गजमारुह्य सत्वरं ॥ क्रीडामिषेण पार्श्वोऽपि । तत्पार्श्वे समुपागमत् ॥ ५३ ॥

पछी ते पार्श्वनाथप्रभु पण तुरत (इंद्रना) ऐरावत हाथीनी पण स्पर्धा करनारा हाथीपर चडीने क्रीडा करवाना मिषथी ते कमठ तापस पासे आव्या. ॥ ५३ ॥

कुर्वन्नज्ञानकष्टानि । प्रभुः प्रोवाच तापसं ॥ करोषि त्वं मुधाऽज्ञान–तपः किल दयांविना ५४

अज्ञानकष्ट करता एवा ते तापसने प्रभुए कह्युं के, हे तापस! तुं दयाविना खरेखर फोकट अज्ञानतप करे छे. ॥ ५४ ॥

प्रत्युवाच प्रभुं सोऽथ । यूयं राजेंद्रसूनवः ॥ वाजिक्रीडाविधौ दक्षा । नास्मत्तापसवृत्तिषु ॥ ५५ ॥

पछी ते तापसे भगवानने कह्युं के, तमो राजपुत्रो घोडा खेलाववानी क्रियामां चतुर हो छो, परंतु अमारी तापसोनी क्रियामां चतुर होता नथी. ॥ ५५ ॥

तदा पार्श्वाज्ञया काष्ट–मध्याद्भृत्येन सत्वरं ॥ कुठारेण द्विधा कृत्वा । न्यकास्यद्दग्धपन्नगः ॥५६॥

पछी पार्श्वप्रभुनी आज्ञाथी तुरत एक नोकरे (ते बळता) काष्टने कुहाडाथी चीरीने तेमांथी बळता सर्पने बहार कढाव्यो. ५६

धिग् धिगस्तु कृतो लोकै–स्तापसः कमठः शठः ॥ प्रशंसां पार्श्वनाथस्य । लोका विदधिरे मुहुः ५७

त्यारे लोकोए ते दुष्ट एवा कमठ तापसने धिक्कार्यो, तथा श्रीपार्श्वनाथप्रभुनी वारंवार प्रशंसा करी. ॥ ५७ ॥

कियद्वर्षे गतेऽन्येद्यु–र्विज्ञाय समयं प्रभुः ॥ दत्वा संवत्सरीदानं । लेभे दीक्षां जिनाधिपः ॥ ५८ ॥

ए रीते केटलाक वर्षो गयाबाद एक वखते ते श्रीजिनेश्वरप्रभुए समय जाणीने सांवत्सरिक दान देइने दीक्षा लीधी. ॥ ५८ ॥

एकदा श्रीजिनाधीशो । मूले वटतरोः स्वयं ॥ कायोत्सर्गे स्थिताः संति । ध्यानस्तिमितलोचनाः ॥५९॥

एक वखते ते श्रीजिनेश्वरप्रभु पोते वडना वृक्षनी नीचे ध्यानवडे आंखो मींचीने कायोत्सर्गध्यानमां रहेला छे. ॥ ५९ ॥

दुर्ध्यानात्कमठो मृत्वा । मेघमाली सुरोऽजनि ॥ उपसर्गे कृते तस्मिन् । न चचाल प्रभुर्मनाक् ॥ ६० ॥

हवे ते कमठतापस दुर्ध्यानथी मरीने मेघमाली देव थयो, तेणे प्रभुने उपसर्ग कर्या, परंतु प्रभु जरा पण चलायमान थया नही. ॥ ६० ॥

अवाप्य केवलज्ञानं । श्रीपार्श्वपरमेश्वरः ॥ भुक्त्वा वर्षशतायुष्कं । जगाम शिवमंदिरं ॥ ६१ ॥

पछी ते श्रीपार्श्वनाथप्रभु केवलज्ञान पामीने, तथा एकसो वर्षोनुं आयु भोगवीने मोक्षे गया. ॥ ६१ ॥

अस्मिन् दिनेऽभूज्जिनपार्श्वजन्म । प्रोक्तस्ततोऽयं दिवसः प्रशस्यः ॥
इत्थं बभाषे जिनवर्धमानः । श्रीश्रेणिकक्ष्मोणिपतेः पुरस्तात् ॥ ६२ ॥

आ पोषदशमीने दिवसे श्रीपार्श्वनाथप्रभुनो जन्म थयेलो छे, अने तेथी आ दिवसने उत्तम कहेलो छे, ए रीते श्रीमहावीरप्रभुए श्रेणिकराजानी आगळ कह्युं. ॥ ६२ ॥

किं कर्तव्यं दिनेऽस्मिंश्च । कृते प्रश्ने क्ष्माधवे ॥ उवाच भगवान् वीरः । श्रेणिकादिसभापुरः ॥ ६३ ॥

ते दिवसे शुं करवुं ? एम राजाए प्रश्न करवाथी श्रीमहावीरप्रभुए श्रेणिकआदिक सभानी आगळ कह्युं के, ॥ ६३ ॥

दिनेऽद्य श्रावकैर्भक्त्या । केसरैश्चारुचंदनैः ॥ जिनालये जिनेंद्राणां । पूजा कार्या विचक्षणैः ॥ ६४ ॥

ए दिवसे विचक्षण श्रावकोए भक्तिपूर्वक केसरथी तथा मनोहर चंदनथी जिनमंदिरमां रहेलां जिनबिंबोनी पूजा करवी. ॥ ६४ ॥

सत्सप्तदशभेदेन । श्राद्धैः पार्श्वजिनेशितुः ॥ अष्टोत्तरीस्नात्रपूजा । विधेया विधिपूर्वकं ॥ ६५ ॥

वळी श्रावकोए सत्तर प्रकारे श्रीपार्श्वनाथप्रभुनी अष्टोत्तरी स्नात्रपूजा विधिपूर्वक करवी. ॥ ६५ ॥

खेलनाखेलनं कार्यं । स्तोतव्यं स्तवनैर्नवैः ॥ भावना भावनीया च । श्रीपार्श्वजिनमंदिरे ॥ ६६ ॥

वळी श्रीपार्श्वप्रभुना जिनमंदिरमां नृत्य करवुं, तथा नवां स्तवनोवडे तेमनी स्तुति करवी, अने भावना भाववी. ॥ ६६ ॥

ग्राममध्ये परग्रामे । यत्र श्रीपार्श्वमंदिरं ॥ श्रीसंघैस्तत्र गंतव्यं । श्रीपार्श्वनमनेहया ॥ ६७ ॥

वळी गाममां तथा परगाममां ज्यां श्रीपार्श्वनाथप्रभुनुं जिनमंदिर होय, त्यां श्रीपार्श्वनाथप्रभुने नमस्कार करवानी इच्छाथी श्रीसंघे जवुं. ॥ ६७ ॥

श्रीगुरूणां पदाब्जानि । नम्यानि श्रावकैस्ततः ॥ श्रोतव्यं तन्मुखात्पार्श्व-प्रबंधं बंधबंधुरं ॥ ६८ ॥

पछी श्रावकोए श्रीगुरुमहाराजना चरणकमलोने नमस्कार करवो, तथा तेमना मुखथी मनोहर रचनावाळुं श्रीपार्श्वप्रभुनुं चरित्र सांभळवुं. ॥ ६८ ॥

प्रतिलाभ्यास्ततः श्राद्धैः । साधवः स्वगृहागताः ॥ आज्यैः प्राज्यैः सखंडैश्च । तद्दिने तु विशेषतः ॥ ६९ ॥

पछी श्रावकोए ते दिवसे विशेष प्रकारे पोताने घेर आवेला साधुओने खांडसहित मनोहर घृतथी प्रतिलाभवा. ॥ ६९ ॥

पानीयाचाम्लवल्लोकैः । प्रभूतैः सुघृतैस्ततः ॥ भोजनैर्भोजनं कार्य-मेकाशनतपः पुनः ॥ ७० ॥

पछी लोकोए जळना आचाम्लनीपेठे घणां उत्तम प्रकारनां भोजनोवडे भोजन करवुं, तथा एकाशननो तप करवो. ॥ ७० ॥

भुक्त्वा पश्चात्समुत्थाय। पयः पेयं पुनर्नहि ॥ तदाचाम्लतपोलाभं। तद्दिने लभतेतरां ॥ ७१ ॥

भोजन करीने उठ्यावाद फरीने जल पीवुं नही, तेथी ते दिवसे आचाम्लतपनो लाभ मळे छे. ॥ ७१ ॥

एवं हि देशना दत्ता। श्रीमद्ज्ञातनंदनैः॥ समुत्थिताः सर्वसभ्याः। श्रेणिकप्रमुखा आपि ॥ ७२ ॥

ए रीते श्रीमान् श्रीमहावीरप्रभुए देशना आपी, पछी ते श्रेणिकआदि सभाना सर्व लोको उठ्या. ॥ ७२ ॥

जग्मुः स्वस्वगृहे तैस्तै–स्तथैव कृतमुत्तमैः॥ अस्मिन् दिनेऽधुनाप्येवं। सा तु रीतिर्विधीयते ॥ ७३ ॥

तथा पोतपोताने घेर गया, तथा ते ते उत्तम जनोए ते रीतेज कर्युं, अने त्यारथी ते आ पोषदशमीने दिवसे हजु पण तेज रीति ए प्रमाणे कराय छे. ॥ ७३ ॥

माहात्म्यमेतद्विधिना जना ये। शृण्वंति पौषादिमसद्दशम्याः॥

सदा लभंतेऽद्भुतसंपदस्ते। सौभाग्यसद्भाग्ययशःप्रतिष्ठाः ॥ ७४ ॥

जे माणसो विधिपूर्वक आ पोषदशमनुं माहात्म्य सांभळे छे, तेओ हमेशां अद्भुत संपत्ति, सौभाग्य, सद्भाग्य, यश तथा प्रतिष्ठा पामे छे. ॥ ७४ ॥

श्रीमद्यशस्वज्जलराशिशिष्यो। मुख्यो जिनेंद्राब्धिरमुं प्रबंधं ॥
श्रीश्रीमतां गौतमसागराणां। वाक्येन शीघ्रं रचयांचकार ॥ ७५ ॥

श्रीमान् यशःसागरना मुख्य शिष्य श्रीजिनेंद्रसागरे श्रीमान् गौतमसागरजीना कहेवाथी तुरत आ (पौषदशमीनो) प्रबंध रच्यो छे. ॥ ७५ ॥

॥ इति श्रीपौषदशमीकथा संपूर्णा ॥

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे तेनुं गुजराती भाषांतर करी, ते सहित स्वपरना हितमाटे पोताना श्रीजैनभास्करोदय प्रिन्टिंग प्रेसमां छापी प्रसिद्ध कर्यो छे ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥ श्रीरस्तु ॥

॥ इति श्रीपौषदशमीकथा समाप्ता ॥